# Śrī Tattva Sandarbha

# Appendix

# Sanskrit Text

कृष्णवर्णं त्विषाकृष्णं साङ्गोपाङ्गास्त्रपार्षदम् ।
यज्ञैः सङ्कीर्तनप्रायैर्यजन्ति हि सुमेधसः ॥ १ ॥

अन्तः कृष्णं बहिर्गौरं दर्शिताङ्गादिवैभवम् ।
कलौ सङ्कीर्तनाद्यैः स्मः कृष्णचैतन्यमाश्रिताः ॥ २ ॥

जयतां मथुराभूमौ श्रीलरूपसनातनौ ।
यौ विलेखयतस्तत्त्वं ज्ञापकौ पुस्तिकामिमाम् ॥ ३ ॥

कोऽपि तद्बान्धवो भट्टो दक्षिणद्विजवंशजः ।
विविच्य व्यलिखद् ग्रन्थं लिखिताद् वृद्धवैष्णवैः ॥ ४ ॥

तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितम् ।
पर्यालोच्याथ पर्यायं कृत्वा लिखति जीवकः ॥ ५ ॥

यः श्रीकृष्णपदाम्भोजभजनैकाभिलाषवान् ।
तेनैव दृश्यतामेतदन्यस्मै शपथोऽर्पितः ॥ ६ ॥

अथ नत्वा मन्त्रगुरून् गुरून् भागवतार्थदान् ।
श्रीभागवतसन्दर्भं सन्दर्भं वश्मि लेखितुम् ॥ ७ ॥

यस्य ब्रह्मेति सञ्ज्ञां क्वचिदपि निगमे याति चिन्मात्रसत्ताप्य्-
अंशो यस्यांशकैः स्वैर्विभवति वशयन्नेव मायां पुमागंश्च ।
एकं यस्यैव रूपं विलसति परमव्योम्नि नारायणाख्यं
स श्रीकृष्णो विधत्तां स्वयमिह भगवान् प्रेम तत्पादभाजाम् ॥ ८ ॥

९ । अथैवं सूचितानां श्रीकृष्णतद्वाच्यवाचकतालक्षणसम्बन्धतद्भजनलक्षणविधेयसपर्याया-भिधेयतत्प्रेमलक्षणप्रयोजनाख्यानामर्थानां निर्णयाय तावत् प्रमाणं निर्णीयते । तत्र पुरुष-स्य भ्रमादिदोषचतुष्टयदुष्टत्वात् सुतरामलौकिकाचिन्त्यस्वभाववस्तुस्पर्शायोग्यत्वाच् च तत्प्रत्यक्षादीन्यपि सदोषाणि ॥

१० । ततस्तानि न प्रमाणानीत्यनादिसिद्धसर्वपुरुषपरम्परासु सर्वलौकिकालौकिकज्ञान-निदानत्वादप्राकृतवचनलक्षणो वेद एवास्माकं सर्वातीतसर्वाश्रयसर्वाचिन्त्याश्चर्यस्वभावं वस्तु विविदिषतां प्रमाणम् ॥

११ । तच् चानुमतम् "तर्काप्रतिष्ठानात्" (ब्र० सू० २।१।११) इत्यादौ "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्" (म० भा० ६।५।२२) इत्यादौ "शास्त्रयोनित्वात्" (ब्र० सू० १।१।३) इत्यादौ "श्रुतेस्तु शब्दमूलत्वात्" (ब्र० सू० २।१।२७) इत्यादौ "पितृदेवमनुष्याणां वेदश्चक्षु-स्तवेश्वर श्रेयस्त्वनुपलब्धेऽर्थे साध्यसाधनयोरपि" (भा० ११।२०।४) इत्यादौ ॥

१२ । तत्र च वेदशब्दस्य सम्प्रति दुष्पारत्वाद् दुरधिगमार्थत्वाच् च तदर्थनिर्णायकानां मुनी-नामपि परस्परविरोधाद् वेदरूपो वेदार्थनिर्णायकश्चेतिहासपुराणात्मकः शब्द एव विचार-णीयः । तत्र च यो वा वेदशब्दो नात्मविदितः सोऽपि तद्दृष्ट्यानुमेय एवेति सम्प्रति तस्यैव प्रमोत्पादकत्वं स्थितम् ।

तथा हि महाभारते मानवीये च "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्" (म० भा० १।१।२६७) इति "पूरणात् पुराणम्" इति चान्यत्र । न चावेदेन वेदस्य बृंहणं सम्भवति । न ह्यपरिपूर्णस्य कनकवलयस्य त्रपुणा पूरणं युज्यते ।

ननु यदि वेदशब्दः पुराणमितिहासं चोपादत्ते तर्हि पुराणमन्यदन्वेषणीयम् ।

यदि तु न न तर्हीतिहासपुराणयोरभेदो वेदेन । उच्यते — विशिष्टैकार्थप्रतिपादकपदकदम्ब-स्यापौरुषेयत्वादभेदेऽपि स्वरक्रमभेदाद् भेदनिर्देशोऽप्युपपद्यते ।

ऋगादिभिः सममनयोरपौरुषेयत्वेनाभेदो माध्यन्दिनश्रुतावेव व्यज्यते "एवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणम्" (बृ० आ० २।४।१०) इत्यादिना ॥

१३ । अत एव स्कान्दप्रभासखण्डे (स्कान्दे २।३-५) —

पुरा तपश्चचारोग्रममराणां पितामहः ।
आविर्भूतास्ततो वेदाः सषडङ्गपदक्रमाः ॥ ९ ॥
ततः पुराणमखिलं सर्वशास्त्रमयं ध्रुवम् ।
नित्यशब्दमयं पुण्यं शतकोटिप्रविस्तरम् ॥ १० ॥
निर्गतं ब्रह्मणो वक्त्रात् तस्य भेदान् निबोधत ।
ब्राह्म्यं पुराणं प्रथमम् ॥ ११ ॥ इत्यादि ।

अत्र शतकोटिसङ्ख्या ब्रह्मलोके प्रसिद्धेति तथोक्तम् । तृतीयस्कन्धे च "ऋग्यजुःसामाथर्वाख्यान् वेदान् पूर्वादिभिर्मुखैः" (भा० ३।१२।३७) इति । इत्यादिप्रकरणे (भा० ३।१२।३९) —

इतिहासपुराणानि पञ्चमं वेदमीश्वरः ।
सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ॥ १२ ॥ इति ।

अपि चात्र साक्षादेव वेदशब्दः प्रयुक्तः पुराणेतिहासयोः ।
अन्यत्र च — "पुराणं पञ्चमो वेदः" । "इतिहासः पुराणं च पञ्चमो वेद उच्यते" (भा० १।४।२०) । "वेदानध्यापयामास महाभारतपञ्चमान्" (म० भा० १२।३४०।२१) इत्यादौ ।
अन्यथा "वेदान्" इत्यादावपि पञ्चमत्वं नावकल्पेत समानजातीयनिवेशितत्वात् सङ्ख्यायाः ।
भविष्यपुराणे "कार्ष्णं च पञ्चमं वेदं यन् महाभारतं स्मृतम" इति ।
तथा च सामकौथुमीयशाखायां छान्दोग्योपनिषदि च "ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासं पुराणं पञ्चमं वेदानां वेदम्" (छा० ७।१।२) इत्यादि ।
अत एव "अस्य महतो भूतस्य" (बृ० २।४।१०) इत्यादावितिहासपुराणयोश्चतुर्णामेवान्तर्भूतत्वकल्पनया प्रसिद्धप्रत्याख्यानं निरस्तम् । तदुक्तम् "ब्राह्म्यं पुराणं प्रथमम्" इत्यादि ॥ १४ । पञ्चमत्वे कारणं च वायुपुराणे सूतवाक्यम् (वा० १।६०।१६-१८, २१-२२) —

इतिहासपुराणानां वक्तारं सम्यगेव हि ।
मां चैव प्रतिजग्राह भगवानीश्वरः प्रभुः ॥ १३ ॥
एक आसीद् यजुर्वेदस्तं चतुर्धा व्यकल्पयत् ।
चातुर्होत्रमभूत् तस्मिंस्तेन यज्ञमकल्पयत् ॥ १४ ॥
आध्वर्यवं यजुर्भिस्तु ऋग्भिर्होत्रं तथैव च ।
औद्गात्रं सामभिश्चैव ब्रह्मत्वं चाप्यथर्वभिः ॥ १५ ॥
आख्यानैश्चाप्युपाख्यानैर्गाथाभिर्द्विजसत्तमाः ।
पुराणसंहिताश्चक्रे पुराणार्थविशारदः ॥ १६ ॥
यच् छिष्टं तु यजुर्वेद इति शास्त्रार्थनिर्णयः ॥ १७ ॥ इति ।

ब्रह्मयज्ञाध्ययने च विनियोगो दृश्यतेऽमीषाम् "यद् ब्राह्मणानीतिहासपुराणानि" (तैत्तिरीयारण्यके २।९) इति । सोऽपि नावेदत्वे सम्भवति ।
अतो यदाह भगवान् । मात्स्ये (५३।८-९) —

कालेनाग्रहणं मत्वा पुराणस्य द्विजोत्तमाः ॥ १८ ।
व्यासरूपमहं कृत्वा संहरामि युगे युगे ॥ १९ ॥ इति ।

पूर्वसिद्धमेव पुराणं सुखसङ्ग्रहणाय सङ्कल्पयामीति तत्रार्थः ।
तदनन्तरं ह्युक्तम् (मात्स्ये ५३।९-११) —

चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा । २० ॥
तदष्टादशधा कृत्वा भूर्लोकेऽस्मिन् प्रभाष्यते ।
अद्याप्यमर्त्यलोके तु शतकोटिप्रविस्तरम् ॥ २१ ॥
तदर्थोऽत्र चतुर्लक्षः सङ्क्षेपेण निवेशितः ॥ २२ ॥ इति ।

अत्र तु "यच् छिष्टं तु यजुर्वेदः" इत्युक्तत्वात् तस्याभिधेयभागश्चतुर्लक्षस्त्वत्र मर्त्यलोके सङ्क्षेपेण सारसङ्ग्रहेण निवेशितः । न तु रचनान्तरेण ॥
१५ । तथैव दर्शितं वेदसहभावेन शिवपुराणस्य वायवीयसंहितायाम् (शि० १।३३–३४) —

सङ्क्षिप्य चतुरो वेदांश्चतुर्धा व्यभजत् प्रभुः ।
व्यस्तवेदतया ख्यातो वेदव्यास इति स्मृतः ॥ २३ ॥
पुराणमपि सङ्क्षिप्तं चतुर्लक्षप्रमाणतः ।
अद्याप्यमर्त्यलोके तु शतकोटिप्रविस्तरम् ॥ २४ ॥ इति ।

सङ्क्षिप्तमित्यत्र तेनेति शेषः ।
स्कान्दमाग्नेयमित्यादि समाख्यास्तु प्रवचननिबन्धनाः काठकादिवत् । आनुपूर्वीर्निर्माणनिबन्धना वा । तस्मात् क्वचिदनित्यत्वश्रवणं त्वाविर्भावतिरोभावापेक्षया ।
तदेवमितिहासपुराणयोर्वेदत्वं सिद्धम् ।
तथापि सूतादीनामधिकारः — सकलनिगमवल्लीसत्फलश्रीकृष्णनामवत् ।
यथोक्तं प्रभासखण्डे —

मधुरमधुरमेतन् मङ्गलं मङ्गलानां सकलनिगमवल्लीसत्फलं चित्स्वरूपम् ।
सकृदपि परिगीतं श्रद्धया हेलया वा भृगुवर नरमात्रं तारयेत् कृष्णनाम ॥ २५ ॥

इति । यथा चोक्तं विष्णुधर्मे —

ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ।
अधीतास्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥ २६ ॥ इति ।

अथ वेदार्थनिर्णायकत्वं च वैष्णवे —

भारतव्यपदेशेन ह्याम्नायार्थः प्रदर्शितः ।
वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः ॥ २७ ॥ इत्यादौ ।

किं च वेदार्थदीपकानां शास्त्राणां मध्यपातिताभ्युपगमेऽप्याविर्भावकवैशिष्ट्यात् तयोरेव वैशिष्ट्यम् ।
यथा पाद्मे —

द्वैपायनेन यद् बुद्धं ब्रह्माद्यैस्तन् न बुध्यते ।
सर्वबुद्धं स वै वेद तद् बुद्धं नान्यगोचरः ॥ २८ ॥ इति ॥

१६ । स्कान्दे —

व्यासचित्तस्थिताकाशादवच्छिन्नानि कानिचित् ।
अन्ये व्यवहरन्त्येतान्युरीकृत्य गृहादिव ॥ २९ ॥ इति ।

तथैव दृष्टं श्रीविष्णुपुराणे पराशरवाक्यम् (वि० पु० ३।४।२-५) —

ततोऽत्र मत्सुतो व्यास अष्टाविंशतिमेऽन्तरे ।
वेदमेकं चतुष्पादं चतुर्धा व्यभजत् प्रभुः ॥ ३० ॥
यथात्र तेन वै व्यस्ता वेदव्यासेन धीमता ।
वेदस्तथा समस्तैस्तैर्व्यासैरन्यैस्तथा मया ॥ ३१ ॥
तदनेनैव व्यासानां शाखाभेदान् द्विजोत्तम ।
चतुर्युगेषु रचितान् समस्तेष्ववधारय ॥ ३२ ॥
कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् ।
कोऽन्यो हि भुवि मैत्रेय महाभारतकृद् भवेत् ॥ ३३ ॥ इति ।

स्कान्द एव —

नारायणाद् विनिष्पन्नं ज्ञानं कृतयुगे स्थितम् ।
किञ्चित् तदन्यथा जातं त्रेतायां द्वापरेऽखिलम् ॥ ३४ ॥
गौतमस्य ऋषेः शापाज् ज्ञाने त्वज्ञानतां गते ।
सङ्कीर्णबुद्धयो देवा ब्रह्मरुद्रपुरःसराः ॥ ३५ ॥
शरण्यं शरणं जग्मुर्नारायणमनामयम् ।
तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः ॥ ३६ ॥
अवतीर्णो महायोगी सत्यवत्यां पराशरात् ।
उत्सन्नान् भगवान् वेदानुज्जहार हरिः स्वयम् ॥ ३७ ॥ इति ।

वेदशब्देनात्र पुराणादिद्वयमपि गृह्यते । तदेवमितिहासपुराणविचार एव श्रेयानिति सिद्धम् । तत्रापि पुराणस्यैव गरिमा दृश्यते ।
उक्तं हि नारदीये —

वेदार्थादधिकं मन्ये पुराणार्थं वरानने ।
वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः ॥ ३८ ॥
पुराणमन्यथा कृत्वा तिर्यग्योनिमवाप्नुयात् ।
सुदान्तोऽपि सुशान्तोऽपि न गतिं क्वचिदाप्नुयात् ॥ ३९ ॥ इति ॥

१७ । स्कान्दप्रभासखण्डे (५।३।१२१-१२४) —

वेदवन् निश्चलं मन्ये पुराणार्थं द्विजोत्तमाः ।
वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः ॥ ४० ॥
बिभेत्यल्पश्रुताद् वेदो मामयं चालयिष्यति ।
इतिहासपुराणैस्तु निश्चलोऽयं कृतः पुरा ॥ ४१ ॥
यन् न दृष्टं हि वेदेषु तद् दृष्टं स्मृतिषु द्विजाः ।
उभयोर्यन् न दृष्टं हि तत् पुराणैः प्रगीयते ॥ ४२ ॥
यो वेद चतुरो वेदान् साङ्गोपनिषदो द्विजाः ।
पुराणं नैव जानाति न च स स्याद् विचक्षणः ॥ ४३ ॥ इति ।

अथ पुराणामेवं प्रामाण्ये स्थितेऽपि तेषामपि सामस्त्येनाप्रचरद्रूपत्वात् नाना देवताप्रतिपादकप्रायत्वादर्वाचीनैः क्षुद्रबुद्धिभिरर्थो दुरधिगम इति तदवस्थ एव संशयः ।
यदुक्तं मात्स्ये (५३।६५, ६८-६९) —

पञ्चाङ्गत्वं पुराणं स्यादाख्यानमितरत् स्मृतम् ॥ ४४ ॥
सात्त्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः ।
राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः ॥ ४५ ॥
तद्वदग्नेश्च माहात्म्यं तामसेषु शिवस्य च ।
सङ्कीर्णेषु सरस्वत्याः पितॄणां च निगद्यते ॥ ४६ ॥ इति ।

अत्राग्नेस्तत्तदग्नौ प्रतिपाद्यस्य तत्तद्यज्ञस्येत्यर्थः । शिवस्य चेति चकाराच् छिवायाश्च । “सङ्कीर्णेषु” सत्त्वरजस्तमोमयेषु कल्पेषु बहुषु । “सरस्वत्याः” नाना वाण्यात्मकतदुपलक्षितायाः नाना देवताया इत्यर्थः ।
“पितॄणाम्” “कर्मणा पितृलोकः” (बृ० १।५।१६) इति ।
श्रुतेस्तत् प्रापककर्मणामित्यर्थः ॥
१८ । तदेवं सति तत्तत्कल्पकथामयत्वेनैव मात्स्य एव प्रसिद्धानां तत्तत्पुराणानां व्यवस्था ज्ञापिता । तारतम्यं तु कथं स्यात् येनेतरनिर्णयः क्रियेत ? सत्त्वादितारतम्येनैवेति चेत् “सत्त्वात् सञ्जायते ज्ञानम्” (गीता १४।१७) इति “सत्त्वं यद् ब्रह्मदर्शनम्” (भा० १।२।२४) इति च न्यायात् सात्त्विकमेव पुराणादिकं परमार्थज्ञानाय प्रबलमित्यायातम् ।
तथापि परमार्थेऽपि नानाभङ्ग्या विप्रतिपद्यमानानां समाधानाय किं स्यात् । यदि सर्वस्यापि वेदस्य पुराणस्य चार्थनिर्णयाय तेनैव श्रीभगवता व्यासेन ब्रह्मसूत्रं कृतं तदवलोकनेनैव सर्वोऽर्थो निर्णेय इत्युच्यते तर्हि नान्यसूत्रकारमुन्यनुगतैर्मन्येत । किं चात्यन्तगूढार्थानामल्पाक्षराणां तत्सूत्राणामन्यार्थत्वं कश्चिदाचक्षीत ततः कतरदिवात्र समाधानम् ?
तद एवं समाधेयम् — यद्येकतममेव पुराणलक्षणमपौरुषेयं शास्त्रं सर्ववेदेतिहासपुराणानामर्थसारं ब्रह्मसूत्रोपजीव्यं च भवद् भुवि सम्पूर्णं प्रचरद्रूपं स्यात् ।

सत्यमुक्तम् । यत एव च सर्वप्रमाणानां चक्रवर्तिभूतमस्मदभिमतं श्रीमद्भागवतमेवोद्भावितं भवता ॥

१९ । यत् खलु सर्वं पुराणजातमाविर्भाव्य ब्रह्मसूत्रं च प्रणीयाप्य परितुष्टेन तेन भगवता निजसूत्राणामकृत्रिमभाष्यभूतं समाधिलब्धमाविर्भावितं यस्मिन्नेव सर्वशास्त्रसमन्वयो दृश्यते । सर्ववेदार्थलक्षणां गायत्रीमधिकृत्य प्रवर्तितत्वात् ।
तथा हि तत्स्वरूपं मात्स्ये (५३।२०-२२) —

यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥ ४७ ॥
लिखित्वा तच् च यो दद्याद्धेमसिंहसमन्वितम् ।
प्रौष्ठपद्यां पौर्णमास्यां स याति परमां गतिम् ॥ ४८ ॥
अष्टादशसहस्राणि पुराणं तत् प्रकीर्तितम् ॥ ४९ ॥ इति ।

अत्र गायत्रीशब्देन तत्सूचकतदव्यभिचारिधीमहिपदसंवलिततदर्थमेवेष्यते । सर्वेषां मन्त्राणामादिरूपायास्तस्याः साक्षात्कथनानर्हत्वात् । तदर्थता च "जन्माद्यस्य यतः" (भा० १।१।१) "तेन ब्रह्म हृदा" इति सर्वलोकाश्रयत्वबुद्धिवृत्तिप्रेरकत्वादिसाम्यात् ।
धर्मविस्तर इत्यत्र धर्मशब्दः परमधर्मपरः । "धर्मः प्रोज्झितकैतवोऽत्र परमः" (भा० १।१।२) इत्यत्रैव प्रतिपादितत्वात् । स च भगवद्ध्यानादिलक्षण एवेति पुरस्ताद् व्यक्तीभविष्यति ॥

२० । एवं स्कान्दे प्रभासखण्डे च "यत्राधिकृत्य गायत्रीम्" (७।१।२।४०-४२) इत्यादि ।

सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः ।
तद्वृत्तान्तोद्भवं लोके तच् च भागवतं स्मृतम् ॥ ५० ॥
लिखित्वा तच् च यो दद्याद्धेमसिंहसमन्वितम् ।
पौर्णमास्यां प्रौष्ठपद्यां स याति परमां गतिम् ॥ ५१ ॥
अष्टादशसहस्राणि पुराणं तत् प्रकीर्तितम् ॥ ५२ ॥

"लिखित्वा तच् च" इत्यादि । "अष्टादशसहस्राणि पुराणं तत् प्रकीर्तितम्" (अग्निपुराणे २७२।६-७) ।
इति टीकाकृद्भिः प्रमाणीकृते पुराणान्तरं च —

ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः ।
हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ॥ ५३ ॥
गायत्र्या च समारम्भस्तद् वै भागवतं विदुः ॥ ५४ ॥ इति ।

अत्र "हयग्रीवब्रह्मविद्या" इति वृत्रवधसाहचर्येण नारायणवर्मैवोच्यते । हयग्रीवशब्देनात्राश्वशिरा दधीचिरेवोच्यते । तेनैव च प्रवर्तिता नारायणवर्माख्या ब्रह्मविद्या । तस्याश्वशिरस्त्वं च षष्ठे "यद् वा अश्वशिरो नाम" (भा० ६।९।५२) इत्यत्र प्रसिद्धम् । नारायणवर्मणो ब्रह्मविद्यात्वं च —

एतच् छ्रुत्वा तथोवाच दध्यङाथर्वणस्तयोः ।
प्रवर्ग्यं ब्रह्मविद्यां च सत्कृतोऽसत्यशङ्कितः ॥ ५५ ॥

टीकोत्थापितवचनेन चेति । श्रीमद्भागवतस्य भगवत्प्रियत्वेन भागवताभीष्टत्वेन च परमसात्त्विकत्वम् । यथा पाद्मे अम्बरीषं प्रति गौतमप्रश्नः—

पुराणं त्वं भागवतं पठसे पुरतो हरेः ।
चरितं दैत्यराजस्य प्रह्लादस्य च भूपते ॥ ५६ ॥

तत्रैव व्यञ्जुलीमाहात्म्ये तस्य तस्मिन्नुपदेशः—

रात्रौ तु जागरः कार्यः श्रोतव्या वैष्णवी कथा ॥ ५७ ॥
गीतानामसहस्रं च पुराणं शुकभाषितम् ।
पठितव्यं प्रयत्नेन हरेः सन्तोषकारणम् ॥ ५८ ॥

तत्रैवान्यत्र—

अम्बरीष शुकप्रोक्तं नित्यं भागवतं शृणु ।
पठस्व स्वमुखेनैव यदीच्छसि भवक्षयम् ॥ ५९ ॥

स्कान्दे प्रह्लादसंहितायां द्वारकामाहात्म्ये—

श्रीमद्भागवतं भक्त्या पठते हरिसन्निधौ ।
जागरे तत्पदं याति कुलवृन्दसमन्वितः ॥ ६० ॥ इति ॥

२१ । गारुडे च—

पूर्णः सोऽयमतिशयः ।
अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः ॥ ६१ ॥
गायत्रीभाष्यरूपोऽसौ वेदार्थपरिबृंहितः ।
पुराणानां सामरूपः साक्षाद्भगवतोदितः ॥ ६२ ॥
द्वादशस्कन्धयुक्तोऽयं शतविच्छेदसंयुतः ।
ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिधः ॥ ६३ ॥ इति ।

ब्रह्मसूत्राणामर्थस्तेषामकृत्रिमभाष्यभूत इत्यर्थः । पूर्वं सूक्ष्मत्वेन मनस्याविर्भूतं तदेव सङ्क्षिप्य सूत्रत्वेन पुनः प्रकटितं पश्चाद् विस्तीर्णत्वेन साक्षाच्छ्रीभागवतमिति । तस्मात् तद्भाष्यभूते स्वतःसिद्धे तस्मिन् सत्यर्वाचीनमन्यदन्येषां स्वस्वकपोलकल्पितं तदनुगतमेवादरणीयमिति गम्यते ।
भारतार्थविनिर्णयः—

निर्णयः सर्वशास्त्राणां भारतं परिकीर्तितम् ॥ ६४ ॥
भारतं सर्ववेदाश्च तुलामारोपिताः पुरा ।
देवैर्ब्रह्मादिभिः सर्वैरृषिभिश्च समन्वितैः ॥ ६५ ॥
व्यासस्यैवाज्ञया तत्र त्वत्यरिच्यत भारतम् ।
महत्त्वाद् भारवत्त्वाच् च महाभारतमुच्यते ॥ ६६ ॥ इति ।

इत्याद्युक्तलक्षणस्य भारतस्यार्थविनिर्णयो यत्र सः । श्रीभगवत्येव तात्पर्यं तस्यापि । तदुक्तं मोक्षधर्मे नारायणीये श्रीवेदव्यासं प्रति जनमेजयेन (म० भा० १२।३४३।११–१४) —

इदं शतसहस्राद्धि भारताख्यान विस्तरात् ।
आमथ्य मतिमन्थेन ज्ञानोदधिमनुत्तमम् ॥ ६७ ॥
नव नीतं यथा दध्नो मलयाच् चन्दनं यथा ।
आरण्यकं च वेदेभ्य ओषधिभ्योऽमृतं यथा ॥ ६८ ॥
समुद्धृतमिदं ब्रह्मन् कथामृतमनुत्तमम् ।
तपोनिधे त्वयोक्तं हि नारायणकथाश्रयम् ॥ ६९ ॥ इति ॥

२२ । तथा च तृतीये (भा० ३।५।१२) —

मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः ।
यस्मिन् नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता नु हरेः कथायाम् ॥ ७० ॥ इति ।

तस्माद् गायत्रीभाष्यरूपोऽसौ । तथैव हि विष्णुधर्मोत्तरादौ तद्व्याख्याने भगवानेव विस्तरेण प्रतिपादितः । अत्र "जन्माद्यस्य" इत्यस्य व्याख्यानं च तथा दर्शयिष्यते ।
"वेदार्थपरिबृंहितः" वेदार्थस्य परिबृंहणं यस्मात् । तच् चोक्तम् "इतिहासपुराणाभ्याम्" इत्यादि ।
"पुराणानां सामरूपः" वेदेषु सामवत् स तेषु श्रेष्ठ इत्यर्थः ।
अत एव स्कान्दे (विष्णुखण्डे मार्गशीर्षमाहात्म्ये १६।४०–४२, ४४, ३३) —

शतशोऽथ सहस्रैश्च किमन्यैः शास्त्रसङ्ग्रहैः ॥ ७१ ॥
न यस्य तिष्ठते गेहे शास्त्रं भागवतं कलौ ॥ ७२ ॥
कथं स वैष्णवो ज्ञेयः शास्त्रं भागवतं कलौ ।
गृहे न तिष्ठते यस्य स विप्रः श्वपचाधमः ॥ ७३ ॥
यत्र यत्र भवेद् विप्र शास्त्रं भागवतं कलौ ।
तत्र तत्र हरिर्याति त्रिदशैः सह नारद ॥ ७४ ॥
यः पठेत् प्रयतो नित्यं श्लोकं भागवतं मुने ।
अष्टादशपुराणानां फलं प्राप्नोति मानवः ॥ ७५ ॥ इति ।

शतविच्छेदसंयुतः — पञ्चत्रिंशदधिकशतत्रयाध्यायविशिष्ट इत्यर्थः । स्पष्टार्थमन्यत् । तदेवं परमार्थविवित्सुभिः श्रीभागवतमेव साम्प्रतं विचारणीयमिति स्थितम् ।
हेमाद्रेर्व्रतखण्डे १।२८ (भा० १।४।२५) —

स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।
कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह ।
इति भारतमाख्यानं कृपया मुनिना कृतम् ॥ ७६ ॥

इति वाक्यं श्रीभागवतीयत्वेनोत्थाप्य भारतस्य वेदार्थतुल्यत्वेन निर्णयः कृत इति । तन्मतानुसारेण त्वेवं व्याख्येयम् — भारतार्थस्य विनिर्णयः । वेदार्थतुल्यत्वेन विशिष्य निर्णयो यत्रेति ।
यस्मादेवं भगवत्परस्तस्मादेव "यत्राधिकृत्य गायत्रीम्" इति कृतलक्षणश्रीमद्भागवतनामा ग्रन्थः श्रीभगवत्पराया गायत्र्या भाष्यरूपोऽसौ । तदुक्तम् "यत्राधिकृत्य गायत्रीम्" इत्यादि । तथैव ह्यग्निपुराणे तस्य व्याख्याने विस्तरेण प्रतिपादितः ।
तत्र तदीयव्याख्यादिग्दर्शनं यथा "तज्ज्योतिः परमं ब्रह्म भर्गस्तेजो यतः स्मृतः" (अग्निपुराणे २१८।३) इति ।
इत्यारभ्य पुनराह (अग्निपुराणे २१८।७-९) —

तज्ज्योतिर्भगवान् विष्णुर्जगज्जन्मादिकारणम् ।
शिवं केचित् पठन्ति स्म शक्तिरूपं पठन्ति च ॥ ७७ ॥
केचित् सूर्यं केचिदग्निं दैवतान्यग्निहोत्रिणः ।
अग्न्यादिरूपो विष्णुर्हि वेदादौ ब्रह्म गीयते ॥ ७८ ॥ इति ।

अत्र "जन्माद्यस्य" इत्यस्य व्याख्यानं च तथा दर्शयिष्यते । "कस्मै येन विभासितोऽयम्" (भा० १२।१३।१९) इत्युपसंहारवाक्ये च "तच्छुद्धम्" (भा० १२।१३।१९) इत्यादिसमानमेवाग्निपुराणे तद् व्याख्यानम् ।

नित्यं शुद्धं परं ब्रह्म नित्यभर्गमधीश्वरम् ।
अहं ज्योतिः परं ब्रह्म ध्यायेम हि विमुक्तये ॥ ७९ ॥ इति ।

अत्राहं ब्रह्मेति "नादेवो देवमर्चयेत्" इति न्यायेन योग्यत्वाय स्वस्य तादृक्त्वभावना दर्शिता । ध्यायेमेति — अहं तावत् ध्यायेयं सर्वे च वयं ध्यायेमेत्यर्थः ।
तदेतन्मते तु मन्त्रेऽपि भर्गशब्दोऽयमदन्त एव स्यात् । "सुपां सुलुक्" (पाणिनि ७।१।३९) इत्यादिना छान्दससूत्रेण तु द्वितीयैकवचनस्य "अमः" सुभावो ज्ञेयः ।
यत् तु द्वादशे "ॐ नमस्ते" (भा० १२।६।६७) इत्यादि गद्येषु तदर्थत्वेन सूर्यः स्तुतः । तत् परमात्मदृष्ट्यैव न तु स्वातन्त्र्येणेत्यदोषः ।

तथैवाग्रे श्रीशौनकवाक्यम् "ब्रूहि नः श्रद्दधानानां व्यूहं सूर्यात्मनो हरेः" (भा० १२।११।२८) इति ।
न चास्य भर्गस्य सूर्यमण्डलमात्राधिष्ठानत्वम् । मन्त्रे वरेण्यशब्देनात्र च ग्रन्थे परशब्देन परमैश्वर्यपर्यन्ततायां दर्शितत्वात् ।
तदेवमग्निपुराणेऽप्युक्तम् (२१६।१६) —

ध्यानेन पुरुषोऽयं च द्रष्टव्यः सूर्यमण्डले ।
सत्यं सदाशिवं ब्रह्म विष्णोर्यत् परमं पदम् ॥ ८० ॥ इति ।

त्रिलोकीजनानामुपासनार्थं प्रलये विनाशिनि सूर्यमण्डले चान्तर्यामितया प्रादुर्भूतोऽयं पुरुषो ध्यानेन द्रष्टव्यः — उपासितव्यः । यत् तु विष्णोस्तस्य महावैकुण्ठरूपं परमं पदम् । तदेव "सत्यम्" कालत्रयाव्यभिचारि । "सदाशिवम्" उपद्रवशून्यम् । यतो ब्रह्मस्वरूपमित्यर्थः ।
तदेतद् गायत्रीं प्रोच्य पुराणलक्षणप्रकरणे "यत्राधिकृत्य गायत्रीम्" इत्याद्यप्युक्तमग्निपुराणे (२७२।६) । तस्मात् —

अग्नेः पुराणं गायत्रीं समेत्य भगवत्पराम् ।
भगवन्तं तत्र मत्वा जगज्जन्मादिकारणम् ॥ ८१ ॥
यत्राधिकृत्य गायत्रीमिति लक्षणपूर्वकम् ।
श्रीमद्भागवतं शश्वत् पृथ्व्यां जयति सर्वतः ॥ ८२ ॥

तदेवमस्य शास्त्रस्य गायत्रीमधिकृत्य प्रवृत्तिर्दर्शिता ।
यत् तु सारस्वतकल्पमधिकृत्येति पूर्वमुक्तम् । तच् च गायत्र्या भगवत्प्रतिपादकवाग्विशेषरूपसरस्वतीत्वादुपयुक्तमेव । यदुक्तमग्निपुराणे (२१६।१-२) —

गायत्र्युक्थानि शास्त्राणि भर्गं प्राणांस्तथैव च ।
ततः स्मृतेयं गायत्री सावित्री यत एव च ॥ ८३ ॥
प्रकाशिनी सा सवितुर्वाग्रूपत्वात् सरस्वती ॥ ८४ ॥ इति ।

अथ क्रमप्राप्ता व्याख्या "वेदार्थपरिबृंहितः" इति वेदार्थानां परिबृंहणं यस्मात् । तच् चोक्तम् "इतिहासपुराणाभ्याम्" इति ।
"पुराणानां सामरूपः" इति वेदेषु सामवत् पुराणेषु श्रेष्ठ इत्यर्थः ।
पुराणान्तराणां केषाञ्चिदापाततो रजस्तमसी जुषमाणैस्तत्परत्वाप्रतीतत्वेऽपि वेदानां काण्डत्रयवाक्यैकवाक्यतायां यथा साम्ना तथा तेषां श्रीभागवतेन प्रतिपाद्ये श्रीभगवत्येव पर्यवसानमिति भावः । तदुक्तम् (हरिवंशे ३।१३२।९५) —

वेदे रामायणे चैव पुराणे भारते तथा ।
आदावन्ते च मध्ये च हरिः सर्वत्र गीयते ॥ ८५ ॥ इति ।

प्रतिपादयिष्यते च तदिदं परमात्मसन्दर्भे ।
साक्षाद् भगवतोदितमिति "कस्मै येन विभासितोऽयम्" (भा० १२।१३।१९) इत्युपसंहारवाक्यानुसारेण ज्ञेयम् ।
शतविच्छेदसंयुत इति — विस्तारभिया न विव्रियते ।
तदेवं श्रीमद्भागवतं सर्वशास्त्रचक्रवर्तिपदमाप्तमिति स्थिते "हेमसिंहसमन्वितम्" इत्यत्र हेमसिंहासनमारूढमिति टीकाकारैर्यद् व्याख्यातं तदेव युक्तम् ।
अतः श्रीमद्भागवतस्यैवाभ्यासावश्यकत्वं श्रेष्ठत्वं च स्कान्दे निर्णीतम् "शतशोऽथ सहस्रैश्च किमन्यैः शास्त्रसङ्ग्रहैः" (विष्णुखण्डे मार्गशीर्षमाहात्म्ये १६।४०) इति ।
तदेवं परमार्थविवित्सुभिः श्रीभागवतमेव साम्प्रतं विचारणीयमिति स्थितम् ॥
२३ । अत एव सत्स्वपि नानाशास्त्रेष्वेतदेवोक्तम् "कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः" (भा० १।३।४४) इति । अर्कतारूपकेण तद् विना नान्येषां सम्यग्वस्तुप्रकाशकत्वमिति प्रतिपद्यते ।
यस्यैव श्रीमद्भागवतस्य भाष्यभूतं श्रीहयशीर्षपञ्चरात्रे शास्त्रप्रस्तावे गणितं तन्त्रभागवताभिधं तन्त्रम् । यस्य साक्षाच् छ्रीहनुमद्भाष्यवासनाभाष्यसम्बन्धोक्तिविद्वत्कामधेनुतत्त्वदीपिकाभावार्थदीपिकापरमहंसप्रियाशुकहृदयादयो व्याख्याग्रन्थाः । तथा मुक्ताफलहरिलीलाभक्तिरत्नावल्यादयो निबन्धाश्च विविधा एव तत्तन्मतप्रसिद्धमहानुभावकृता विराजन्ते ।
यदेव च हेमाद्रिग्रन्थस्य दानखण्डे पुराणदानप्रस्तावे मत्स्यपुराणीयतल्लक्षणधृत्या प्रशस्तम् ।
हेमाद्रिपरिशेषखण्डस्य कालनिर्णये च कलियुगधर्मनिर्णये "कलिं सभाजयन्त्यार्याः" (भा० ११।५।३६) इत्यादिकं यद्वाक्यत्वेनोथाप्य यत् प्रतिपादितधर्म एव कलावङ्गीकृतः ।
अथ यदेव कैवल्यमप्यतिक्रम्य भक्तिसुखव्याहारादिलिङ्गेन निजमतस्याप्युपरि विराजमानार्थं मत्वा यदपौरुषेयं वेदान्तव्याख्यानं भयादचालयतैव शङ्करावतारतया प्रसिद्धेन वक्ष्यमाणस्वगोपनादिहेतुकभगवदाज्ञाप्रवर्तिताद्वयवादेनापि तन्मात्रवर्णितविश्वरूपदर्शनकृतव्रजेश्वरीविस्मयश्रीव्रजकुमारीवसनचौर्यादिकं गोविन्दाष्टकादौ वर्णयता तटस्थीभूय निजवचःसाफल्याय स्पृष्टमिति ॥
२४ । यदेव किल दृष्ट्वा श्रीमध्वाचार्यचरणैर्वैष्णवान्तराणां तच्छिष्यान्तरपुण्यारण्यादिरीतिकव्याख्याप्रवेशशङ्कया तत्र तात्पर्यान्तरं लिखद्भिर्वर्त्मोपदेशः कृत इति च सात्वता वर्णयन्ति ।
तस्माद् युक्तमुक्तं तत्रैव प्रथमस्कन्धे (भा० १।३।४१–४२) —

तदिदं ग्राहयामास सुतमात्मवतां वरम् ।
सर्ववेदेतिहासानां सारं सारं समुद्धृतम् ॥ ८६ ॥

द्वादशे (भा० १२।१३।१५) —

सर्ववेदान्तसारं हि श्रीभागवतमिष्यते ।
तद्रसामृततृप्तस्य नान्यत्र स्याद् रतिः क्वचित् ॥ ८७ ॥

तथा प्रथमे (भा० १।१।३) —

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ ८८ ॥

अत एव तत्रैव (भा० १।२।३) —

यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोऽन्धम् ।
संसारिणां करुणयाह पुराणगुह्यं तं व्याससूनुमुपयामि गुरुं मुनीनाम् ॥ ८९ ॥
इति ।

श्रीभागवतमतं तु सर्वमतानामधीशरूपमिति सूचकम् । सर्वमुनीनां सभामध्यमध्यास्योप-
देष्टृत्वेन तेषां गुरुत्वमपि तस्य तत्र सुव्यक्तम् ॥
२५ । यतः (भा० १।१९।८-१२) —

तत्रोपजग्मुर्भुवनं पुनाना महानुभावा मुनयः सशिष्याः ।
प्रायेण तीर्थाभिगमापदेशैः स्वयं हि तीर्थानि पुनन्ति सन्तः ॥ ९० ॥
अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमिर्भृगुरङ्गिराश्च ।
पराशरो गाधिसुतोऽथ राम उतथ्य इन्द्रप्रमदेध्मवाहौ ॥ ९१ ॥
मेधातिथिर्देवल आर्ष्टिषेणो भारद्वाजो गौतमः पिप्पलादः ।
मैत्रेय और्वः कवषः कुम्भयोनिर्द्वैपायनो भगवान् नारदश्च ॥ ९२ ॥
अन्ये च देवर्षिब्रह्मर्षिवर्या राजर्षिवर्या अरुणादयश्च ।
नानार्षेयप्रवरान् समेतानभ्यर्च्य राजा शिरसा ववन्दे ॥ ९३ ॥
सुखोपविष्टेष्वथ तेषु भूयः कृतप्रणामः स्वचिकीर्षितं यत् ।
विज्ञापयामास विविक्तचेता उपस्थितोऽग्रेऽभिगृहीतपाणिः ॥ ९४ ॥

इत्याद्यनन्तरम् (भा० १।१९।२४) —

ततश्च वः पृच्छ्यमिमं विपृच्छे विश्रभ्य विप्रा इति कृत्यतायाम् ।
सर्वात्मना म्रियमाणैश्च कृत्यं शुद्धं च तत्रामृशताभियुक्ताः ॥ ९५ ॥

इति पृच्छति राज्ञि (भा० १।१९।२५) —

तत्राभवद् भगवान् व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः ।
अलक्ष्यलिङ्गो निजलाभतुष्टो वृतश्च बालैरवधूतवेषः ॥ ९६ ॥

ततश्च “प्रत्युत्थितास्ते मुनयः स्वासनेभ्यः” (भा० १।१९।२८) इति ।
इत्याद्यन्ते (भा० १।१९।३०) —

स संवृतस्तत्र महान् महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसङ्घैः ।
व्यरोचतालं भगवान् यथेन्दुर्ग्रहर्क्षतारानिकरैः परीतः ॥ ९७ ॥ इत्युक्तम् ॥

२६ । अत्र यद्यपि तत्र श्रीव्यासनारदौ तस्यापि गुरुपरमगुरू तथापि पुनस्तन्मुखनिःसृतं श्रीभागवतं तयोरप्यश्रुतचरमिव जातमित्येवं श्रीशुकस्तावप्युपदिदेश देश्यमित्यभिप्रायः । यदुक्तम् “शुकमुखादमृतद्रव्यसंयुतम्” (भा० १।१।३) इति । तस्मादेवमपि श्रीभागवतस्यैव सर्वाधिक्यम् । मात्स्यादीनां यत् पुराणाधिक्यं श्रूयते तत् त्वापेक्षिकमिति । अहो किं बहुना ? श्रीकृष्णप्रतिनिधिरूपमेवेदम् ।
यत उक्तं प्रथमस्कन्धे (भा० १।३।४५) —

कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ।
कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः ॥ ९८ ॥ इति ।

अत एव सर्वगुणयुक्तत्वमस्यैव दृष्टम् “धर्मः प्रोज्झितकैतवोऽत्र” (भा० १।१।२) ।
इत्यादिना —

वेदाः पुराणं काव्यं च प्रभुर्मित्रं प्रियेव च ।
बोधयन्तीति हि प्राहुस्त्रिवृद् भागवतं पुनः ॥ ९९ ॥
इति मुक्ताफले हेमाद्रिकारवचनेन च ।

तस्मान् मन्यन्तां वा केचित् पुराणान्तरेषु वेदसापेक्षत्वं श्रीभागवते तु तथा सम्भावना स्वयमेव निरस्तेत्यपि स्वयमेव लब्धं भवति । अत एव परमश्रुतिरूपत्वं तस्य । यथोक्तम् (भा० १।४।७) —

कथं वा पाण्डवेयस्य राजर्षेर्मुनिना सह ।
संवादः समभूत् तात यत्रैषा सात्वती श्रुतिः ॥ १०० ॥ इति ।

अथ यत् खलु सर्वं पुराणजातमाविर्भाव्येत्यादिकं पूर्वमुक्तं तत् तु प्रथमस्कन्धगतश्रीव्यासनारदसंवादेनैव प्रमेयम् ॥
२७ । तदेवं परमनिःश्रेयसनिश्चयाय श्रीभागवतमेव पौर्वापर्याविरोधेन विचार्यते । तत्रास्मिन् सन्दर्भषट्कात्मके ग्रन्थे सूत्रस्थानीयम् — अवतारिकावाक्यं विषयवाक्यं श्रीभागवतवाक्यम् । भाष्यरूपा तद्व्याख्या तु सम्प्रति मध्यदेशादौ व्याप्तानद्वैतवादिनो नूनं भगवन्महिमानमवगाहयितुं तद्वादेन कर्बुरितलिपीनां परमवैष्णवानां श्रीधरस्वामिचरणानां शुद्धवैष्णवसिद्धान्तानुगता चेत् तर्हि यथावदेव विलिख्यते ।

क्वचित् तेषामेवान्यत्रदृष्टव्याख्यानुसारेण द्रविडादिदेशविख्यातपरमभागवतानां तेषामेव बाहुल्येन तत्र वैष्णवत्वेन प्रसिद्धत्वात् ।
श्रीभागवत एव “क्वचित् क्वचिन् महाराज द्रविडेषु च भूरिशः” (भा० ११।५।३९) इति ।
इत्यनेन प्रथितमहिम्नां साक्षाच् छ्रीप्रभृतितः प्रवृत्तसम्प्रदायानां श्रीवैष्णवाभिधानां श्रीरामानुजभगवत्पादविरचितश्रीभाष्यादिदृष्टमतप्रामाण्येन मूलग्रन्थस्वारस्येन चान्यथा च ।
अद्वैतव्याख्यानं तु प्रसिद्धत्वान् नातिवितायते ॥
२८ । अत्र च स्वदर्शितार्थविशेषप्रामाण्यायैव न तु श्रीमद्भागवतवाक्यप्रामाण्याय प्रमाणानि श्रुतिपुराणादिवचनानि यथादृष्टमेवोदाहरणीयानि । क्वचित् स्वयमदृष्टाकराणि च तत्त्ववादगुरूणामनाधुनिकानां प्रचुरप्रचारितवैष्णवमतविशेषाणां दक्षिणादिदेशविख्यातशिष्योपशिष्यीभूतविजयध्वजव्यासतीर्थादिवेदवेदार्थविद्वराणां श्रीमध्वाचार्यचरणानां भागवततात्पर्यभारततात्पर्यब्रह्मसूत्रभाष्यादिभ्यः सङ्गृहीतानि ।
तैश्चैवमुक्तं भारततात्पर्ये —

> शास्त्रान्तराणि सञ्जानन् वेदान्तस्य प्रसादतः ।
> देशे देशे तथा ग्रन्थान् दृष्ट्वा चैव पृथग्विधान् ॥ १०१ ॥
> यथा स भगवान् व्यासः साक्षान् नारायणः प्रभुः ।
> जगाद भारताद्येषु तथा वक्ष्ये तदीक्षया ॥ १०२ ॥ इति ।

तत्र तदुद्धृता श्रुतिश्चतुर्वेदशिखाद्या पुराणं च गारुडादीनां सम्प्रति सर्वत्राप्रचरद्रूपमंशादिकम् । संहिता च महासंहितादिका तन्त्रं च तन्त्रभागवतादिकं ब्रह्मतर्कादिकमिति ज्ञेयम् ॥
२९ । अथ नमस्कुर्वन्नेव तथाभूतस्य श्रीमद्भागवतस्य तात्पर्यतद्वक्तुर्हृदयनिष्ठापर्यालोचनया सङ्क्षेपतस्तावन् निर्धारयति (भा० १२।१२।६९) —

> स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोऽप्यजितरुचिरलीलाकृष्टसारस्तदीयम् ।
> व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं व्याससूनुं नतोऽस्मि ॥ १०३ ॥

टीका च श्रीधरस्वामिविरचिता — श्रीगुरुं नमस्करोति । स्वसुखेनैव निभृतं पूर्णं चेतो यस्य सः । तेनैव व्युदस्तोऽन्यस्मिन् भावो भावना यस्य तथाभूतोऽप्यजितस्य रुचिराभिर्लीलाभिराकृष्टः सारः स्वसुखगतं धैर्यं यस्य सः । तत्त्वदीपं परमार्थप्रकाशकं श्रीभागवतं यो व्यतनुत तं नतोऽस्मीत्येषा ।
एवमेव द्वितीये तद्वाक्यमेव “प्रायेण मुनयो राजन्” (भा० २।१।७) इत्यादिपद्यत्रयमनुसन्धेयम् । अत्राखिलवृजिनं तादृशभावस्य प्रतिकूलमुदासीनं च ज्ञेयम् ।
तदेवमिह सम्बन्धितत्त्वं ब्रह्मानन्दादपि प्रकृष्टो रुचिरलीलावशिष्टः श्रीमानजित एव । स च पूर्णत्वेन मुख्यतया श्रीकृष्णसञ्ज्ञ एवेति श्रीबादरायणसमाधौ व्यक्तीभविष्यति ।
तथा प्रयोजनाख्यः पुरुषार्थश्च तादृशतदासक्तिजनकं तल्लीलाश्रवणादिलक्षणं तद्भजनमेवेत्यायातम् ।

अत्र व्याससूनुमिति ब्रह्मवैवर्तानुसारेण श्रीकृष्णवराज् जन्मत एव मायया तस्यास्पृष्टत्वं सूचितम् ॥
श्रीसूतः श्रीशौनकम् ॥
३० । तादृशमेव तात्पर्यं करिष्यमाणतद्ग्रन्थप्रतिपाद्यतत्त्वनिर्णयकृते तत्प्रवक्तृश्रीबादरायणकृते समाधावपि सङ्क्षेपत एव निर्धारयति (भा० १।७।४-८) —

भक्तियोगेन मनसि सम्यक् प्रणिहितेऽमले ।
अपश्यत् पुरुषं पूर्णं मायां च तदपाश्रयम् ॥ १०४ ॥
यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम् ।
परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते ॥ १०५ ॥
अनर्थोपशमं साक्षाद् भक्तियोगमधोक्षजे ।
लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहिताम् ॥ १०६ ॥
यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे ।
भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा ॥ १०७ ॥
स संहितां भागवतीं कृत्वानुक्रम्य चात्मजम् ।
शुकमध्यापयामास निवृत्तिनिरतं मुनिः ॥ १०८ ॥

तत्र (भा० १।७।९) —

स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः ।
कस्य वा बृहतीमेतामात्मारामः समभ्यसत् ॥ १०९ ॥

इति शौनकप्रश्नानन्तरं च (भा० १।७।१०-११) —

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः ॥ ११० ॥
हरेर्गुणाक्षिप्तमतिर्भगवान् बादरायणिः ।
अध्यगान् महदाख्यानं नित्यं विष्णुजनप्रियः ॥ १११ ॥

भक्तियोगेन प्रेम्णा । भा० ५।६।१८ —

अस्त्वेवमङ्ग भगवान् भजतां मुकुन्दो ।
मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम् ॥ ११२ ॥

इत्यत्र प्रसिद्धेः । प्रणिहिते समाहिते “समाधिनानुस्मर तद्विचेष्टितम्” (भा० १।५।१३) इति तं प्रति श्रीनारदोपदेशात् । पूर्णपदस्य मुक्तप्रग्रहया वृत्त्या —

> भगवानिति शब्दोऽयं तथा पुरुष इत्यपि ।
> वर्तते निरुपाधिश्च वासुदेवेऽखिलात्मनि ॥ ११३ ॥
> इति पाद्मोत्तरखण्डवचनावष्टम्भेन (२२६।६८) ।

तथा (भा० २।३।९-१०) —

> कामकामो यजेत् सोममकामः पुरुषं परम् ।
> अकामः सर्वकामो वा मोक्षकाम उदारधीः ॥ ११४ ॥
> तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥ ११५ ॥

इत्यस्य वाक्यद्वयस्य पूर्ववाक्ये "पुरुषं परमात्मानं प्रकृत्येकोपाधिम्" उत्तरवाक्ये "पुरुषं पूर्णं निरुपाधिम्" इति टीकानुसारेण च पूर्णः पुरुषोऽत्र स्वयं भगवानेव उच्यते ॥

३१ । "पूर्वम्" इति पाठे "पूर्वमेवाहमिहासम्" इति "तत्पुरुषस्य पुरुषत्वम्" इति श्रौतनिर्वचनविशेषपुरस्कारेण च स एवोच्यते ।

तमपश्यत् श्रीवेदव्यास इति स्वरूपशक्तिमन्तमेवेत्येतत् स्वयमेव लब्धम् । "पूर्णं चन्द्रमपश्यद्" इत्युक्ते "कान्तिमन्तमपश्यद्" इति लभ्यते ।

अत एव (भा० १।७।२३) —

> त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः ।
> मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥ ११६ ॥ इत्युक्तम् ।

अत एव "मायां च तदपाश्रयाम्" इत्यनेन तस्मिनप अपकृष्ट आश्रयो यस्याः । निलीय स्थितत्वादिति मायाया न तत्स्वरूपभूतत्वमित्यपि लभ्यते । वक्ष्यते च "माया परैत्यभिमुखे च विलज्जमाना" (भा० २।७।४७) इति ।

स्वरूपशक्तिरियमत्रैव व्यक्तीभविष्यति "अनर्थोपशमं साक्षाद् भक्तियोगमधोक्षजे" (भा० १।७।६) इत्यनेन "आत्मारामाश्च" (भा० १।७।१०) इत्यनेन च । पूर्वत्र हि भक्तियोगप्रभावः खल्वसौ मायाभिभावकतया स्वरूपशक्तिवृत्तित्वेनैव गम्यते । परत्र च ते गुणा ब्रह्मानन्दस्याप्युपरिचरतया स्वरूपशक्तेः परमवृत्तितामेवार्हन्तीति ।

मायाधिष्ठातृपुरुषस्तु तदंशत्वेन ब्रह्म च तदीयनिर्विशेषाविर्भावत्वेन तदन्तर्भावविवक्षया पृथङ् नोक्ते इति ज्ञेयम् । अतोऽत्र पूर्ववदेव सम्बन्धितत्त्वं निर्धारितम् ॥

३२ । अथ प्राक्प्रतिपादितस्यैवाभिधेयस्य प्रयोजनस्य च स्थापकं जीवस्य स्वरूपत एव परमेश्वराद् वैलक्षण्यमपश्यदित्याह ययेति । यया — मायया सम्मोहितो जीवः स्वयं चिद्रूपत्वेन त्रिगुणात्मकाज् जडात् परोऽप्यात्मानं त्रिगुणात्मकं जडं देहादिसङ्घातं मनुते । तन्मननकृतमनर्थं संसारव्यसनं चाभिपद्यते ।

तदेवं जीवस्य चिद्रूपत्वेऽपि "यया सम्मोहितः" इति "मनुते" इति च स्वरूपभूतज्ञानशालित्वं व्यनक्ति प्रकाशैकरूपस्य तेजसः स्वपरप्रकाशनशक्तिवत् "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" (गीता ५।१५) इति श्रीगीताभ्यः । तदेवम् "उपाधेरेव जीवत्वं तन्नाशस्यैव मोक्षत्वम्" इति मतान्तरं परिहृतवान् ।

अत्र "यया सम्मोहितः" इत्यनेन तस्या एव तत्र कर्तृत्वं भगवतस्तत्रोदासीनत्वं मतम् ।
वक्ष्यते च (भा० २।५।१३) —

विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया ।
विमोहिता विकत्थन्ते ममाहमिति दुर्धियः ॥ ११७ ॥ इति ।

अत्र "विलज्जमानया" इत्यनेनेदमायाति तस्या जीवसम्मोहनं कर्म श्रीभगवते न रोचत इति यद्यपि सा स्वयं जानाति ।
तथापि "भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य" (भा० ११।२।३७) इति दिशा जीवानामनादिभगवदज्ञानमयवैमुख्यमसहमाना स्वरूपावरणमस्वरूपावेशं च करोति ॥
३३ । श्रीभगवांश्चानादित एव भक्तायां प्रपञ्चाधिकारिण्यां तस्यां दाक्षिण्यं लङ्घितुं न शक्नोति । तथा तद्भयेनापि जीवानां स्वसाम्मुख्यं वाञ्छन्नुपदिशति (गीता ७।१४) —

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ ११८ ॥

भा० ३।२५।२५ —

सतां प्रसङ्गान् मम वीर्यसंविदो भवन्ति हृत्कर्णरसायनाः कथाः ।
तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति ॥ ११९ ॥ इति ।

लीलया श्रीमद्व्यासरूपेण तु विशिष्टतया तदुपदिष्टवानित्यनन्तरमेवायास्यति । अनर्थोपशमं साक्षादिति । तस्माद् द्वयोरपि तत् तत् समञ्जसं ज्ञेयम् ।
ननु माया खलु शक्तिः । शक्तिश्च कार्यक्षमत्वम् । तच् च धर्मविशेषः । तस्याः कथं लज्जादिकम् ?
उच्यते — एवं सत्यपि भगवति तासां शक्तीनामधिष्ठातृदेव्यः श्रूयन्ते यथा केनोपनिषदि महेन्द्रमाययोः संवादः । तदास्तां प्रस्तुतं प्रस्तूयते ॥
३४ । तत्र जीवस्य तादृशचिद्रूपत्वेऽपि परमेश्वरतो वैलक्षण्यम् "तदपाश्रयम्" इति "यया सम्मोहितः" इति च दर्शयति ॥
३५ । यर्ह्येव यदेकं चिद्रूपं ब्रह्म मायाश्रयतावलितं विद्यामयं तर्ह्येव तन्मायाविषयतापन्नमविद्यापरिभूतं चेत्युक्तमिति जीवेश्वरविभागोऽवगतः । ततश्च स्वरूपसामर्थ्यवैलक्षण्येन तद् द्वितयं मिथो विलक्षणस्वरूपमेवेत्यागतम् ॥
३६ । न चोपाधितारतम्यमयपरिच्छेदप्रतिबिम्बत्वादिव्यवस्थया तयोर्विभागः स्यात् ॥
३७ । तत्र यद्युपाधेरनाविद्यकत्वेन वास्तवत्वं तर्ह्यविषयस्य तस्य परिच्छेदविषयत्वासम्भवः । निर्धर्मकस्य व्यापकस्य निरवयवस्य च प्रतिबिम्बत्वायोगोऽपि । उपाधिसम्बन्धाभावात् बिम्बप्रतिबिम्बभेदाभावात् । दृश्यत्वाभावाच् च । उपाधिपरिच्छिन्नाकाशस्थज्योतिरंशस्यैव प्रतिबिम्बो दृश्यते न त्वाकाशस्य दृश्यत्वाभावादेव ॥

३८ । तथा वास्तवपरिच्छेदादौ सति सामानाधिकरण्यज्ञानमात्रेण न तत्त्यागश्च भवेत् । "तत्पदार्थप्रभावस्तत्र कारणम्" इति चेदस्माकमेव मतं सम्मतम् ॥

३९ । उपाधेराविद्यकत्वे तु तत्र तत्परिच्छिन्नत्वादेरप्यघटमानत्वादाविद्यकत्वमेवेति घटाकाशादिषु वास्तवोपाधिमयतद्दर्शनया न तेषामवास्तवस्वप्नदृष्टान्तोपजीविनां सिद्धान्तः सिध्यति घटमानाघटमानयोः सङ्गतेः कर्तुमशक्यत्वात् । ततश्च तेषां तत् तत् सर्वमविद्याविलसितमेवेति स्वरूपमप्राप्तेन तेन तेन तत् तद् व्यवस्थापयितुमशक्यम् ॥

४० । इति ब्रह्माविद्ययोः पर्यवसाने सति यदेव ब्रह्म चिन्मात्रत्वेनाविद्यायोगस्यात्यन्ताभावास्पदत्वाच् छुद्धं तदेव तद्योगादशुद्ध्या जीवः । पुनस्तदेव जीवाविद्याकल्पितमायाश्रयत्वादीश्वरस्तदेव च तन्मायाविषयत्वाज् जीव इति विरोधस्तदवस्थ एव स्यात् । तत्र च शुद्धायां चित्यविद्या । तदविद्याकल्पितोपाधौ तस्यामीश्वराख्यायां विद्येति तथा विद्यावत्त्वेऽपि मायिकत्वमित्यसमञ्जसा च कल्पना स्यादित्याद्यनुसन्धेयम् ॥

४१ । किं च यद्यत्राभेद एव तात्पर्यमभविष्यत् तर्ह्येकमेव ब्रह्माज्ञानेन भिन्नं ज्ञानेन तु तस्य भेदमयं दुःखं विलीयत इत्यपश्यदित्येवावक्ष्यत् । तथा श्रीभगवल्लीलादीनां वास्तवत्वाभावे सति श्रीशुकहृदयविरोधश्च जायते ॥

४२ । तस्मात् परिच्छेदप्रतिबिम्बत्वादि — प्रतिपादकशास्त्राण्यपि कथञ्चित् तत्सादृश्येन गौण्यैव वृत्त्या प्रवर्तेरन् ।

"अम्बुवदग्रहणात् तु न तथात्वम्" (ब्र० सू० ३।२।१९) "वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्" (ब्र० सू० ३।२।२०) इति पूर्वोत्तरपक्षमयन्यायाभ्याम् ॥

४३ । तत एवाभेदशास्त्राण्युभयोश्चिद्रूपत्वे जीवसमूहस्य दुर्घटघटनापटीयस्या स्वाभाविकतदचिन्त्यशक्त्या स्वभावत एव तद्रश्मिपरमाणुगुणस्थानीयत्वाद् तद्व्यतिरेकेणाव्यतिरेकेण च विरोधं परिहृत्याग्रे मुहुरपि तदेतद्व्याससमाधिलब्धसिद्धान्तयोजनाय योजनीयानि ॥

४४ । तदेवं मायाश्रयत्वमायामोहितत्वाभ्यां स्थिते द्वयोर्भेदे तद्भजनस्यैवाभिधेयत्वमायातम् ॥

४५ । अतः श्रीभगवत एव सर्वहितोपदेष्टृत्वात् सर्वदुःखहरत्वात् रश्मीनां सूर्यवत् सर्वेषां परमस्वरूपत्वात् सर्वाधिकगुणशालित्वात् परमप्रेमयोगत्वमिति प्रयोजनं च स्थापितम् ॥

४६ । तत्राभिधेयं च तादृशत्वेन दृष्टवानपि यतस्तत्प्रवृत्त्यर्थं श्रीभागवताख्यामिमां सात्वतसंहितां प्रवर्तितवानित्याह — अनर्थेति । भक्तियोगः — श्रवणकीर्तनादिलक्षणः साधनभक्तिः । न तु प्रेमलक्षणः । अनुष्ठानं ह्युपदेशापेक्षं प्रेम तु तत्प्रसादापेक्षमिति ।

तथापि तस्य तत्प्रसादहेतोस्तत्प्रेमफलगर्भत्वात् साक्षादेवानर्थोपशमनत्वं न त्वन्यसापेक्षत्वेन ।

"यत् कर्मभिर्यत् तपसा ज्ञानवैराग्यतश्च यत्" इत्यादौ (भा० ११।२०।३२) "सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा । स्वर्गापवर्गम्" (भा० ११।२०।३३) इत्यादेः ।

ज्ञानादेस्तु भक्तिसापेक्षत्वमेव "श्रेयःसृतिं भक्तिम्" (भा० १०।१४।४) इत्यादेः ।

अथवा अनर्थस्य — संसारव्यसनस्य तावत् साक्षादव्यवधानेनोपशमनं सम्मोहादिद्वयस्य तु प्रेमाख्यस्वीयफलद्वारेत्यर्थः । अतः पूर्ववदेवात्राभिधेयं दर्शितम् ॥

४७ । अथ पूर्ववदेव प्रयोजनं च स्पष्टयितुं पूर्वोक्तस्य पूर्णपुरुषस्य च श्रीकृष्णस्वरूपत्वं व्यञ्जयितुं ग्रन्थफलनिर्देशद्वारा तत्र तदनुभवान्तरं प्रतिपादयन्नाह — यस्यामिति ।
"भक्तिः" प्रेमा श्रवणरूपया साधनभक्त्या साध्यत्वात् । "उत्पद्यते" आविर्भवति ।
तस्यानुषङ्गिकं गुणमाह — शोकेति । अत्रैषां संस्कारोऽपि नश्यतीति भावः ।
"प्रीतिर्न यावन् मयि वासुदेवे न मुच्यते देहयोगेन तावत्" (भा० ५।५।६) इति श्रीऋषभदेववाक्यात् ।
परमपूरुषे पूर्वोक्तपूर्णपुरुषे । किमाकारः ? इत्यपेक्षायामाह कृष्णे —
"कृष्णस्तु भगवान् स्वयम्" इत्यादि शास्त्रसहस्रभावितान्तःकरणानां परम्परया तत्प्रसिद्धिमध्यपातिनां चासाङ्ख्लोकानां तन्नामश्रवणमात्रेण ।
यः प्रथमप्रतीतिविषयः स्यात् तथा तन्नाम्नः प्रथमाक्षरमात्रं मन्त्राय कल्पमानं यस्याभिमुख्याय स्यात् — तदाकार इत्यर्थः ।
आहुश्च नामकौमुदीकाराः "कृष्णशब्दस्य तमालश्यामलत्विषि यशोदायाः स्तनन्धये परब्रह्मणि रूढिः" इति ॥
४८ । अथ तस्यैव प्रयोजनस्य ब्रह्मानन्दानुभवादपि परमत्वमनुभूतवान् । यतस्तादृशं शुकमपि तदानन्दवैशिष्ट्यलम्भनाय तामध्यापयामासेत्याह — स संहितामिति ।
कृत्वानुक्रम्य चेति — प्रथमतः स्वयं सङ्क्षेपेण कृत्वा पश्चात् तु श्रीनारदोपदेशादनुक्रमेण विवृत्येत्यर्थः । अत एव श्रीमद्भागवतं भारतानन्तरं यदत्र श्रूयते यच् चान्यत्राष्टादशपुराणानन्तरं भारतमिति तद्द्वयमपि समाहितं स्यात् । ब्रह्मानन्दानुभवनिमग्नत्वात् निवृत्तिनिरतम् — सर्वतो निवृत्तौ निरतं तत्राव्यभिचारिणमपीत्यर्थः ॥
४९ । तमेतं श्रीवेदव्यासस्य समाधिजातानुभवं श्रीशौनकप्रश्नोत्तरत्वेन विशदयन् सर्वात्मारामानुभवेन सहेतुकं संवादयति — आत्मारामाश्चेति । निर्ग्रन्थाः "विधिनिषेधातीताः" निर्गताहङ्कारग्रन्थयो वा । अहैतुकीम् "फलानुसन्धिरहिताम्" । अत्र सर्वाक्षेपपरिहारार्थमाह "इत्थम्भूतः" आत्मारामाणामप्याकर्षणस्वभावो गुणो यस्य स इति ।
तमेवार्थं श्रीशुकस्याप्यनुभवेन संवादयति — हरेर्गुणेति । श्रीव्यासदेवाद् यत्किञ्चिच्छ्रुतेन गुणेन पूर्वमाक्षिप्ता मतिर्यस्य सः । पश्चादध्यगात् महद्विस्तीर्णमिति । ततश्च तत्सङ्कथासौहार्देन नित्यं विष्णुजनाः प्रिया यस्य तथाभूतो वा तेषां प्रियो वा स्वयमभवदित्यर्थः ।
अयं भावः — ब्रह्मवैवर्तानुसारेण पूर्वं तावदयं गर्भमारभ्य श्रीकृष्णस्य स्वैरितया मायानिवारकत्वं ज्ञातवान् । ततः स्वनियोजनया श्रीव्यासदेवेनानीतस्य तस्यान्तर्दर्शनात् तन्निवारणे सति कृतार्थं मन्यतया स्वयमेकामेव गतवान् । तत्र श्रीवेदव्यासस्तु तं वशीकर्तुं तदनन्यसाधनं श्रीभागवतमेव ज्ञात्वा तद्गुणातिशयप्रकाशमयांस्तदीयपद्यविशेषान् कथञ्चिच्छ्रावयित्वा तेन तमाक्षिप्तमतिं कृत्वा तदेव पूर्णं तमध्यापयामासेति श्रीभागवतमहिमातिशयः प्रोक्तः ।
तदेवं दर्शितम् — वक्तुः श्रीशुकस्य वेदव्यासस्य च समानहृदयम् । तस्माद् वक्तुर्हृदयानुरूपमेव सर्वत्र तात्पर्यं पर्यालोचनीयं नान्यथा । यद् यत् तदन्यथा पर्यालोचनं तत्र तत्र कुपथगामितैवेति निष्टङ्कितम् ॥
श्रीसूतः ॥

५० । अथ क्रमेण विस्तरतस्तथैव तात्पर्यं निर्णेतुं सम्बन्धाभिधेयप्रयोजनेषु षड्भिः सन्दर्भै-र्निर्णेष्यमाणेषु प्रथमं यस्य वाच्यवाचकतासम्बन्धीदं शास्त्रं तदेव “धर्मः प्रोज्झितकैतवः” इत्यादिपद्ये । सामान्याकारतस्तावदाह “वेद्यं वास्तवमत्र वस्तु” (भा० १।१।२) इति । टीका च — अत्र श्रीमति सुन्दरे भागवते वास्तवं परमार्थभूतं वस्तु वेद्यं न तु वैशेषिकादिवद् द्रव्यगुणादिरूपमित्येषा ॥
श्रीवेदव्यासः ॥
५१ । अथ किं रूपं तद्वस्तुतत्त्वमित्यत्राह “वदन्ति तत् तत्त्वविदस्तत्त्वं यज् ज्ञानमद्वयम्” (भा० १।२।११) इति ।
“ज्ञानम्” चिदेकरूपम् । अद्वयत्वं चास्य स्वयंसिद्धतादृशातादृशतत्त्वान्तराभावात् स्वश-क्त्येकसहायत्वात् । परमाश्रयं तं विना तासामसिद्धत्वाच् च ।
“तत्त्वम्” इति परमपुरुषार्थताद्योतनया परमसुखरूपत्वं तस्य बोध्यते । अत एव तस्य नित्यत्वं च दर्शितम् ॥
श्रीसूतः ॥
५२ । ननु नीलपीताद्याकारं क्षणिकमेव ज्ञानं दृष्टं तत् पुनरद्वयं नित्यं ज्ञानं कथं लक्ष्यते यन्नि-ष्ठमिदं शास्त्रम् ?
इत्यत्राह (भा० १२।१३।१२) —

> सर्ववेदान्तसारं यद् ब्रह्मात्मैकत्वलक्षणम् ।
> वस्त्वद्वितीयं तन्निष्ठमिति ॥ १२० ॥ इति ।

“सत्यं ज्ञानमनन्तं ब्रह्म” (तै० २।१।१।१) इति यस्य स्वरूपमुक्तम् “येनाश्रुतं श्रुतं भवति” (छा० ६।१।३) इति “यद्विज्ञानेन सर्वविज्ञानं प्रतिज्ञातम्” । “सदेव सौम्येदमग्र आसीत्” (छा० ६।२।१) इत्यादिना निखिलजगदेककारणता । “तदैक्षत बहु स्याम्” (छा० ६।२।३) इत्यनेन सत्यसङ्कल्पता च यस्य प्रतिपादिता तेन ब्रह्मणा स्वरूपशक्तिभ्यां सर्वबृहत्तमेन सार्धम् ।
अनेन “जीवेनात्मना” (छा० ६।३।२) इति तदीयोक्ताविदन्तानिर्देशेन ततो भिन्नत्वेऽप्यात्म-तानिर्देशेन तदात्मांशविशेषत्वेन लब्धस्य बादरायणसमाधिदृष्टयुक्तेरत्यभिन्नतारहितस्य । जीवात्मनो यदेकत्वम् “तत् त्वमसि” (छा० ६।८।७) इत्यादौ जात्या तदंशभूतचिद्रूपत्वेन समानाकारता । तदेव लक्षणं प्रथमतो ज्ञाने साधकतमं यस्य ।
तथाभूतं यत् सर्ववेदान्तसारमद्वितीयं वस्तु तन्निष्ठम् — तदेकविषयमिदं श्रीभागवतमिति प्राक्तनपद्यस्थेनानुषङ्गः ।
यथा जन्मप्रभृति कश्चिद् गृहगुहावरुद्धः सूर्यं विविदिषुः कथञ्चिद् गवाक्षपतितं सूर्यांशुकणं दर्शयित्वा केनचिदुपदिश्यते “एष सः” इति । एतत् तदंशज्योतिःसमानाकारतया तन्महा-ज्योतिर्मण्डलमनुसन्धीयतामित्यर्थस्तद्वत् । जीवस्य तथा तदंशत्वं च तच्छक्तिविशेषसिद्ध-त्वेनैव परमात्मसन्दर्भे स्थापयिष्यामः ।
तदेतज्जीवादिलक्षणांशविशिष्टतयैवोपनिषदस्तस्य सांशत्वमपि क्वचिदुपदिशन्ति । निरं-शत्वोपदेशिका श्रुतिस्तु केवलतन्निष्ठा । अत्र “कैवल्यैकप्रयोजनम्” इति चतुर्थपादश्च

कैवल्यपदस्य शुद्धत्वमात्रवचनत्वेन । शुद्धत्वस्य च शुद्धभक्तित्वेन पर्यवसानेन प्रीतिसन्दर्भे व्याख्यास्यते ॥
श्रीसूतः ॥
५३ । तत्र यदि त्वम्पदार्थस्य जीवात्मनो ज्ञानत्वं नित्यत्वं च प्रथमतो विचारगोचरः स्यात् तदैव तत्पदार्थस्य तादृशत्वं सुबोधं स्यादिति । तद् बोधयितुम् "अन्यार्थश्च परामर्शः" (ब्र० सू० १।३।२०) इति न्यायेन जीवात्मनस्तद्रूपत्वमाह (भा० ११।३।३८) —

> नात्मा जजान न मरिष्यति नैधतेऽसौ न क्षीयते सवनविद् व्यभिचारिणां हि ।
> सर्वत्र शश्वदनपाय्युपलब्धिमात्रं प्राणो यथेन्द्रियबलेन विकल्पितं सत् ॥ १२१ ॥

"आत्मा" शुद्धो जीवः । "न जजान" न जातः । जन्माभावादेव तदनन्तरास्तितालक्षणो विकारोऽपि नास्ति । "नैधते" न वर्धते । वृद्ध्यभावादेव विपरिणामोऽपि निरस्तः । "हि" यस्मात् । "व्यभिचारिणाम्" आगमापायिनाम् । बालयुवादिदेहानां देवमनुष्याद्याकारदेहानां वा । सवनवित् तत्तत्कालद्रष्टा । न ह्यवस्थावतां द्रष्टा तदवस्थो भवतीत्यर्थः । निरवस्थः कोऽसावात्मा ? अत आह — उपलब्धिमात्रं ज्ञानैकरूपम् ।
कथम्भूतम् ? "सर्वत्र" देहे । "शश्वत्" सर्वदा अनुवर्तमानमिति ।
ननु नीलज्ञानं नष्टं पीतज्ञानं जातमिति प्रतीतेर्न ज्ञानस्यानपायित्वम् ?
तत्राह — इन्द्रियबलेनेति । सदेव ज्ञानमेकमिन्द्रियबलेन विविधं कल्पितम् । नीलाद्याकारा वृत्तय एव जायन्ते नश्यन्ति च न ज्ञानमिति भावः ।
अयमागमापायितदवधिभेदेन प्रथमस्तर्कः । द्रष्टृदृश्यभेदेन द्वितीयोऽपि तर्को ज्ञेयः । व्यभिचारिष्ववस्थितस्याव्यभिचारे दृष्टान्तः — प्राणो यथेति ॥
५४ । दृष्टान्तं विवृण्वन्निन्द्रियादिलयेन निर्विकारात्मोपलब्धिं दर्शयति (भा० ११।३।३९) —

> अण्डेषु पेशिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र ।
> सन्ने यदिन्द्रियगणेऽहमि च प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्नः ॥ १२२ ॥

"अण्डेषु" अण्डजेषु । "पेशिषु" जरायुजेषु । "तरुषु" उद्भिज्जेषु । "अविनिश्चितेषु" स्वेदजेषु । "उपधावति" अनुवर्तते ।
एवं दृष्टान्ते निर्विकारत्वं प्रदर्श्य दार्ष्टान्तिकेऽपि दर्शयति । कथम् ? तदैवात्मा सविकार इव प्रतीयते यदा जागरे इन्द्रियगणः । यदा च स्वप्ने तत्संस्कारवानहङ्कारः । यदा तु प्रसुप्तं तदा तस्मिन् प्रसुप्त । "इन्द्रियगणे सन्ने" लीने । कूटस्थो ? निर्विकार एवात्मा । कुतः ? "आशयमृते" लिङ्गशरीरमुपाधिं विना विकारहेतोरुपाधेरभावातित्यर्थः ।
नन्वहङ्कारपर्यन्तस्य सर्वस्य लये शून्यमेवावशिष्यते । क्व तदा कूटस्थ आत्मा ? अत आह "तदनुस्मृतिर्नः" । तस्याखण्डात्मनः सुषुप्तिसाक्षिणः स्मृतिः नः — अस्माकं जाग्रद्द्रष्टॄणां जायते । एतावन्तं कालं सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति । अतोऽननुभूतस्य तस्यास्मरणादस्त्येव सुषुप्तौ तादृगात्मानुभवः । विषयसम्बन्धाभावाच् च न स्पष्ट इति भावः ।

अतः स्वप्रकाशमात्रवस्तुनः सूर्यादेः प्रकाशवदुपलब्धिमात्रस्याप्यात्मन उपलब्धिः— स्वाश्रयेऽस्त्येवेत्यायातम् । तथा च श्रुतिः "यद् वै तन् न पश्यति पश्यन् वै द्रष्टव्यान् न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" (बृ० आ० ४।३।२३) इत्य ।

अयं साक्षिसाक्ष्यविभागेन तृतीयस्तर्कः । दुःखिप्रेमास्पदत्वविभागेन चतुर्थोऽपि तर्कोऽनुगन्तव्यः ॥

५५ । तदुक्तम्—

> अन्वयव्यतिरेकाख्यस्तर्कः स्याच् चतुरात्मकः ।
> आगमापायितदवधिभेदेन प्रथमो मतः ॥ १२३ ॥
> द्रष्टृदृश्यविभागेन द्वितीयोऽपि मतस्तथा ।
> साक्षिसाक्ष्यविभागेन तृतीयः सम्मतः सताम् ॥ १२४ ॥
> दुःखिप्रेमास्पदत्वेन चतुर्थः सुखबोधकः ॥ १२५ ॥

इति श्रीपिप्पलायनो निमिम् ॥

५६ । एवम्भूतानां जीवानां चिन्मात्रं यत् स्वरूपं तयैवाकृत्या तदंशित्वेन च तदभिन्नं यत् तत्त्वं तदत्र वाच्यमिति व्यष्टिनिर्देशद्वारा प्रोक्तम् । तदेव ह्याश्रयसञ्ज्ञकम् । महापुराणलक्षणरूपैः सर्गादिभिरर्थैः समष्टिनिर्देशद्वारापि लक्ष्यत इत्यत्राह द्वाभ्याम् (भा० २।१०।१-२)—

> अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।
> मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥ १२६ ॥
> दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् ।
> वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा ॥ १२७ ॥

मन्वन्तराणि चेशानुकथाश्च मन्वन्तरेशानुकथाः ।

अत्र सर्गादयो दशार्था लक्ष्यन्त इत्यर्थः । तत्र च दशमस्य विशुद्ध्यर्थं तत्त्वज्ञानार्थं नवानां लक्षणं स्वरूपं वर्णयन्ति । नन्वत्र नैवं प्रतीयते ? अत आह—"श्रुतेन" श्रुत्या कण्ठोक्त्यैव स्तुत्यादिस्थानेषु । "अञ्जसा" साक्षाद् वर्णयन्ति । "अर्थेन" तात्पर्यवृत्त्या च तत्तदाख्यानेषु ॥

५७ । तमेव दशमं विस्पष्टयितुं तेषां दशानां व्युत्पादिकां सप्तश्लोकीमाह (भा० २।१०।३)—

> भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः ।
> ब्रह्मणो गुणवैषम्याद् विसर्गः पौरुषः स्मृतः ॥ १२८ ॥

"भूतानि" खादीनि । "मात्राणि च" शब्दादीनि । "इन्द्रियाणि च" धीशब्देन महदहङ्कारौ । "गुणानां वैषम्यात्" परिणामात् । "ब्रह्मणः" परमेश्वरात् कर्तृभूतादीनां जन्म सर्गः पुरुषो वैराजो ब्रह्मा । तत्कृतः पौरुषः । चराचरसर्गो विसर्ग इत्यर्थः ।

भा० २।१०।४-५—

स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः ।
मन्वन्तराणि सद्धर्म ऊतयः कर्मवासनाः ॥ १२९ ॥
अवतारानुचरितं हरेश्चास्यानुवर्तिनाम् ।
पुंसामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः ॥ १३० ॥

वैकुण्ठस्य भगवतो विजयः — सृष्टानां तत्तन्मर्यादापालनेनोत्कर्षः । "स्थितिः" स्थानम् । ततः स्थितेषु स्वभक्तेषु तस्यानुग्रहः "पोषणम्" ।
मन्वन्तराणि तत्तन्मन्वन्तरस्थितानां मन्वादीनां तदनुगृहीतानां सतां चरितानि तान्येव धर्म-स्तदुपासनाख्यः सद्धर्मः ।
तत्रैव स्थितौ नानाकर्मवासना "ऊतयः" । स्थितावेव हरेरवतारानुचरितमस्यानुवर्तिनां च कथाः — ईशानुकथाः प्रोक्ता इत्यर्थः ।
भा० २।१०।६ —

निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः ।
मुक्तिर्हित्वान्यथा रूपं स्वरूपेण व्यवस्थितिः ॥ १३१ ॥

स्थित्यनन्तरं चात्मनो जीवस्य शक्तिभिः स्वोपाधिभिः सहास्य हरेरनुशयनं हरिशयनानुग-तत्वेन शयनं निरोध इत्यर्थः । तत्र हरेः शयनम् — प्रपञ्चं प्रति दृष्टिनिमीलनम् । जीवानां शयनम् — तत्र लय इति ज्ञेयम् ।
तत्रैव निरोधेऽन्यथारूपमविद्याध्यस्तमज्ञत्वादिकं हित्वा स्वरूपेण व्यवस्थितिः — मुक्तिः ॥
५८ । भा० २।१०।७ —

आभासश्च निरोधश्च यतोऽस्त्यध्यवसीयते ।
स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ॥ १३२ ॥

"आभासः" सृष्टिः । "निरोधः" लयश्च यतो भवति । "अध्यवसीयते" उपलभ्यते जीवानां ज्ञा-नेन्द्रियेषु प्रकाशते च । स ब्रह्मेति परमात्मेति प्रसिद्ध आश्रयः कथ्यते ।
इतिशब्दः प्रकारार्थः । तेन भगवानिति च । अस्य विवृतिरग्रे विधेया ॥
५९ । स्थितौ च तत्राश्रयस्वरूपमपरोक्षानुभवेन व्यष्टिद्वारापि स्पष्टं दर्शयितुमध्यात्मादिवि-भागमाह (भा० २।१०।८-९) —

योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः ।
यस्तत्रोभयविच्छेदः पुरुषो ह्याधिभौतिकः ॥ १३३ ॥
एकमेकतराभावे यदा नोपलभामहे ।
त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ॥ १३४ ॥

योऽयमाध्यात्मिकः पुरुषश्चक्षुरादिकरणाभिमानी द्रष्टा जीवः । स एवाधिदैविकश्चक्षुराद्यधिष्ठाता सूर्यादिः ।
देहसृष्टेः पूर्वं करणानामधिष्ठानाभावेनाक्षमतया करणप्रकाशकर्तृत्वाभिमानितत्सहाययोरुभयोरपि तयोर्वृत्तिभेदानुदयेन जीवत्वमात्राविशेषात् । ततश्चोभयः — करणाभिमानितदधिष्ठातृदेवतारूपो द्विरूपो विच्छेदो यस्मात् ।
स आधिभौतिकश्चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः पुरुष इति — पुरुषस्य जीवस्योपाधिः । “स वा एष पुरुषोऽन्नरसमयः” (तै० २।१।१) इत्यादि श्रुतेः ॥
६० । एकमेकतराभाव इत्येषामन्योन्यसापेक्षसिद्धत्वे नानाश्रयत्वं दर्शयति — तथा हि दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सिध्यति । नापि द्रष्टा न च तद् विना करणप्रवृत्त्यनुमेयस्तदधिष्ठाता सूर्यादिः । न च तं विना करणं प्रवर्तते । न च तद् विना दृश्यमित्येकतरस्याभाव एकं नोपलभामहे । तत्र — तदा तत्त्रितयमालोचनात्मकेन प्रत्ययेन । यो वेद साक्षितया पश्यति स परमात्मा आश्रयः । तेषामपि परस्परमाश्रयत्वमस्तीति तद्व्यवच्छेदार्थं विशेषणम् । “स्वाश्रयः” अनन्याश्रयः । स चासावन्येषामाश्रयश्चेति । तत्रांशांशिनोः शुद्धजीवपरमात्मनोरभेदांशस्वीकारेणैवाश्रय उक्तः ।
अतः —

> यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम् ।
> परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते ॥ १३५ ॥
> जाग्रत्स्वप्नसुषुप्तं च गुणतो बुद्धिवृत्तयः ।
> तासां विलक्षणो जीवः साक्षित्वेन विवक्षितः ॥ १३६ ॥ इति ।
> क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचितस्य नित्याः ।
> आविर्हिताः क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तुः ॥ १३७ ॥

इत्याद्युक्तस्य साक्षिसञ्ज्ञिनः शुद्धजीवस्याश्रयत्वं न शङ्कनीयम् । अथवा — नन्वाध्यात्मिकादीनामप्याश्रयत्वमस्त्येव ? सत्यम् । तथापि परस्पराश्रयत्वान् न तत्राश्रयताकैवल्यमिति ते त्वाश्रयशब्देन मुख्यतया नोच्यन्त इत्याह — एकमिति ।
तर्हि साक्षिण एवास्तामाश्रयत्वम् ? तत्राह — त्रितयमिति । स आत्मा साक्षी जीवस्तु यः स्वाश्रयोऽनन्याश्रयः परमात्मा स एवाश्रयो यस्य तथाभूत इति । वक्ष्यते च हंसगुह्यस्तवे “सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे” (भा० ६।४।२५) इति । तस्मात् “आभासश्च” (भा० २।१०।७) इत्यादिनोक्तः परमात्मैवाश्रय इति ॥ श्रीशुकः ॥
६१ । अस्य श्रीभागवतस्य महापुराणत्वव्यञ्जकलक्षणं प्रकारान्तरेण च वदन्नपि तस्यैवाश्रयत्वमाह । द्वयेन (भा० १२।७।९-१०) —

> सर्गोऽस्याथ विसर्गश्च वृत्ती रक्षान्तराणि च ।
> वंशो वंशानुचरितं संस्था हेतुरपाश्रयः ॥ १३८ ॥
> दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ।
> केचित् पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया ॥ १३९ ॥

“अन्तराणि” मन्वन्तराणि ।
पञ्चविधम्—

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥ १४० ॥
इति केचिद् वदन्ति ।

स च मतभेदो महदल्पव्यवस्थया—महापुराणमल्पपुराणमिति भिन्नाधिकरणत्वेन । यद्यपि विष्णुपुराणादावपि दशापि तानि लक्ष्यन्ते तथापि पञ्चानामेव प्राधान्येनोक्तत्वात्—अल्पत्वम् ।
अत्र दशानामर्थानां स्कन्धेषु यथाक्रमं प्रवेशो न विवक्षितः । तेषां द्वादशसङ्ख्यत्वात् । द्वितीयस्कन्धोक्तानां तेषां तृतीयादिषु यथासङ्ख्यं न समावेशः । निरोधादीनां दशमादिष्वष्टमवर्जम् । अन्येषामप्यन्येषु यथोक्तलक्षणतया समावेशनाशक्यत्वादेव ।
तदुक्तं श्रीस्वामिभिरेव—

दशमे कृष्णसत्कीर्तिवितानायोपवर्ण्यते ।
धर्मग्लानिनिमित्तस्तु निरोधो दुष्टभूभुजाम् ॥ १४१ ॥
प्राकृतादिचतुर्धा यो निरोधः स तु वर्णितः ॥ १४२ ॥ इति ।

अतोऽत्र स्कन्धे श्रीकृष्णरूपस्याश्रयस्यैव वर्णनप्राधान्यं तैर्विवक्षितम् । उक्तं च स्वयमेव “दशमे दशमं लक्ष्यमाश्रिताश्रयविग्रहम्” इति ।
एवमन्यत्राप्युन्नेयम् ।
अतः प्रायशः सर्वेऽर्थाः सर्वेष्वेव स्कन्धेषु गुणत्वेन वा मुख्यत्वेन वा निरूप्यन्त इत्येव तेषामभिमतम् । “श्रुतेनार्थेन चाञ्जसा” (भा० २।१०।२) इत्यत्र च तथैव प्रतिपन्नं सर्वत्र तत्तत्सम्भवात् । ततश्च प्रथमद्वितीययोरपि महापुराणतायां प्रवेशः स्यात् । क्रमो न गृहीतः ॥ ६२ । अथ सर्गादीनां लक्षणमाह (भा० १२।७।११)—

अव्याकृतगुणक्षोभान् महतस्त्रिवृतोऽहमः ।
भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते ॥ १४३ ॥

प्रधानगुणक्षोभान् महान् । तस्मात् त्रिगुणोऽहङ्कारः । तस्माद् भूतमात्राणां भूतसूक्ष्माणामिन्द्रियाणां च स्थूलभूतानां च तदुपलक्षिततद्देवतानां च सम्भवः सर्गः । कारणसृष्टिः सर्ग इत्यर्थः ।
भा० १२।७।१२—

पुरुषानुगृहीतानामेतेषां वासनामयः ।
विसर्गोऽयं समाहारो बीजाद् बीजं चराचरम् ॥ १४४ ॥

"पुरुषः" परमात्मा । "एतेषाम्" महदादीनाम् । जीवस्य पूर्वकर्मवासनाप्रधानोऽयं समाहारः—कार्यभूतश्चराचरप्राणिरूपो बीजाद् बीजमिव प्रवाहापन्नो विसर्ग उच्यते । व्यष्टिसृष्टिविसर्ग इत्यर्थः । अनेनोतिरप्युक्ता ।
भा० १२।७।१३—

वृत्तिर्भूतानि भूतानां चराणामचराणि च ।
कृता स्वेन नृणां तत्र कामाच् चोदनयापि वा ॥ १४५ ॥

"चराणाम्" भूतानां सामान्यतोऽचराणि चकाराच् चराणि च कामाद् वृत्तिः । तत्र तु नृणां स्वेन स्वभावेन कामाच् चोदनयापि वा या नियता वृत्तिर्जीविका कृता । सा वृत्तिरुच्यत इत्यर्थः ।
भा० १२।७।१४—

रक्षाच्युतावतारेहा विश्वस्यानुयुगे युगे ।
तिर्यङ्मर्त्यर्षिदेवेषु हन्यन्ते यैस्त्रयीद्विषः ॥ १४६ ॥

"यैः" अवतारैः । अनेन—ईशकथा । स्थानं पोषणं च—इति त्रयमुक्तम् ।
भा० १२।७।१५—

मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वराः ।
ऋषयोऽंशावताराश्च हरेः षड्विधमुच्यते ॥ १४७ ॥

मन्वाद्याचरणकथनेन सद्धर्म एवात्र विवक्षित इत्यर्थः । ततश्च प्राक्तनग्रन्थेनैकार्थ्यम् ।
भा० १२।७।१६—

राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः ।
वंश्यानुचरितं तेषां वृत्तं वंशधराश्च ये ॥ १४८ ॥

तेषां राज्ञां ये च वंशधरास्तेषां वृत्तं वंश्यानुचरितम् ॥
६३ । भा० १२।७।१७—

नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः ।
संस्थेति कविभिः प्रोक्तश्चतुर्धास्य स्वभावतः ॥ १४९ ॥

"अस्य" परमेश्वरस्य । "स्वभावतः" शक्तितः । "आत्यन्तिकः" इत्यनेन मुक्तिरप्यत्र प्रवेशिता ।
भा० १२।७।१८—

हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकः ।
यं चानुशयिनं प्राहुरव्याकृतमुतापरे ॥ १५० ॥

“हेतुः” निमित्तम् । “अस्य” विश्वस्य । यतोऽयमविद्यया कर्मकारकः । यमेव हेतुं केचिच् चैतन्यप्राधानेनानुशयिनं प्राहुः । अपर उपाधिप्राधान्येनाव्याकृतमिति ।
भा० १२।७।१९ —

व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु ।
मायामयेषु तद् ब्रह्म जीववृत्तिष्वपाश्रयः ॥ १५१ ॥

श्रीबादरायणसमाधिलब्धार्थविरोधादत्र च जीवशुद्धस्वरूपमेवाश्रयत्वेन न व्याख्यायते । किन्त्वयमेवार्थः — जाग्रदादिष्ववस्थासु । “मायामयेषु” मायाशक्तिकल्पितेषु महदादिद्रव्येषु च । केवलस्वरूपेण व्यतिरेकः परमसाक्षितयान्वयश्च यस्य तद् ब्रह्म जीवानां वृत्तिषु — शुद्धस्वरूपतया सोपाधितया च वर्तनेषु स्थितिष्वपाश्रयः । सर्वमत्यतिक्रम्याश्रय इत्यर्थः । “अप” इत्येतत् खलु वर्जने वर्जनं चातिक्रमे पर्यवस्यतीति ।
तदेवमपाश्रयाभिव्यक्तिद्वारभूतं हेतुशब्दव्यपदिष्टस्य जीवस्य शुद्धस्वरूपज्ञानमाह । द्वाभ्याम् (भा० १२।७।२०–२१) —

पदार्थेषु यथा द्रव्यं तन्मात्रं रूपनामसु ।
बीजादिपञ्चतां तासु ह्यवस्थासु युतायुतम् ॥ १५२ ॥
विरमेत यदा चित्तं हित्वा वृत्तित्रयं स्वयम् ।
योगेन वा तदात्मानं वेदेहाया निवर्तते ॥ १५३ ॥

रूपनामात्मकेषु पदार्थेषु घटादिषु यथा द्रव्यं पृथिव्यादियुतमयुतं च भवति । कार्यदृष्टिं विनाप्युपलम्भात् । तथा तन्मात्रं शुद्धं जीवचैतन्यमात्रं वस्तु गर्भाधानादिपञ्चतान्तासु नवस्वप्यवस्थास्वविद्यया युतं स्वतस्त्वयुतमिति शुद्धमात्मानमित्थं ज्ञात्वा निर्विण्णः सन्नपाश्रयानुसन्धानयोग्यो भवतीत्याह — विरमेतेति ।
“वृत्तित्रयम्” जाग्रत्स्वप्नसुषुप्तिरूपम् । “आत्मानम्” परमात्मानम् । “स्वयम्” वामदेवादेरिव मायामयत्वानुसन्धानेन देवहूत्यादेरिवानुष्ठितेन योगेन वा । ततश्च “ईहायाः” तदनुशीलनव्यतिरिक्तचेष्टायाः ॥ श्रीसूतः ॥ उद्दिष्टः सम्बन्धः ॥
इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीभगवत् कृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभाजनभाजनश्रीरूपसनातनानुशासनभारतीगर्भे श्रीभागवतसन्दर्भे तत्त्वसन्दर्भो नाम प्रथमः सन्दर्भः ॥